योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०३९

एकोनचत्वारिंशः सर्गः ३९

ईश्वर उवाच ।

पावनं पावनानां यद्यत्सर्वतमसां क्षयः ।

तदिदानीं प्रवक्ष्येऽहमन्तःपूजनमात्मनः ।। १

गच्छतस्तिष्ठतश्चैव जाग्रतः स्वपतोऽपि च ।

सर्वाचारगता पूजा नित्यं ध्यानात्मिका त्वियम् ।। २

नित्यमेव शरीरस्थमिमं ध्यायेत्परं शिवम् ।

सर्वप्रत्ययकर्तारं स्वयमात्मानमात्मना ।। ३

शयानमुत्थितं चैव व्रजन्तमथवा स्थितम् ।

स्पृशन्तमभितः स्पृश्यं त्यजन्तमथवाऽभितः ।। ४

भुञ्जानं संत्यजन्तं च भोगानाभोगपीवरान् ।

बाह्यार्थपरिकर्तारं सर्वकार्यस्वरूपदम् ।। ५

देहलिङ्गेषु शान्तस्थं त्यक्तलिङ्गान्तरादिकम् ।

यथाप्राप्तार्थसंवित्त्या बोधलिङ्गं प्रपूजयेत् ।। ६

प्रवाहपतितार्थस्थः स्वबोधस्नानशुद्धिमान् ।

नित्यावबोधार्हणया बोधलिङ्गं प्रपूजयेत् ।। ७

आदित्यभावनाभोगभाविताम्बरभास्वरम् ।

शशाङ्कभावनाभोगभावितेन्दुतयोदितम् ।। ८

प्रतिभासपदार्थौघनित्यावगतसंविदम् ।

द्वारैर्वहन्तं शारीरैर्मुखे प्राणस्वरूपिणम् ।। ९

रसीकृत्य रसं प्राणस्वान्तोदात्ततुरङ्गमम् ।

प्राणापानरथारूढं गूढमन्तर्गुहाशयम् ।। १०

ज्ञातारं ज्ञेयदृष्टीनां कर्तारं सर्वकर्मणाम् ।

भोक्तारं सर्वभोज्यानां स्मर्तारं सर्वसंविदाम् ।। ११

सम्यक्संविदिताङ्गौघं भावाभावनभावितम् ।

आभासभास्वरं भूरि सर्वगं चिन्तयेच्छिवम् ।। १२

निष्कलं सकलं चैव देहस्थं व्योमचारिणम् ।

अरञ्जितं रञ्जितं च नित्यमङ्गाङ्गसंविदम् ।। १३

मनोमननशक्तिस्थं प्राणापानान्तरोदितम् ।

हृत्कण्ठतालुमध्यस्थं भ्रूनासापुटपीठगम् ।। १४

षट्त्रिंशत्पदकोटिस्थमुन्मन्यन्तदशातिगम् ।

कुर्वन्तमन्तःशब्दादींश्चोदयन्तं मनःखगम् ।। १५

विकल्पिन्यविकल्पे च द्विविधे वाक्पथे स्थितम् ।

तिले तैलमिवाङ्गेषु सर्वेष्वेवान्तरं स्थितम् ।। १६

कलाकलङ्करहितं कठिनं च कलागणैः ।

एकदेशे सुहृत्पद्मे सर्वदेहे च संस्थितम् ।। १७

चिन्मात्रममलाभासं कलाकलनकल्पनम् ।

प्रत्यक्षदृश्यं सर्वत्र स्वानुभूतिमयात्मकम् ।। १८

प्रत्यक्चेतनमात्मीयमर्थित्वेन पुनः स्थितम् ।

पदार्थानामुपेत्याशु क्षणाद्द्वित्वमिवागतम् ।। १९

सहस्तपादावयवः सकेशनखदन्तकः ।

स्वदेहसंविदाभासो देवोऽयमिति भावयेत् ।। २०

विचित्राः शक्तयो बह्व्यो नानाचारा मनोदशाम् ।

उपासते मामनिशं पत्न्यः कान्तमिवोत्तमम् ।। २१

मनो मे द्वारपालोऽयं निवेदितजगत्त्रयः ।

चिन्तेयं मे प्रतीहारी द्वारस्था शुद्धरूपिणी ।। २२

शक्तिर्ममात्मिका बुद्धिः क्रिया चैव वराङ्गना ।

ज्ञानानि च विचित्राणि भूषणान्यङ्गगानि मे ।। २३

कर्मेन्द्रियाणि द्वाराणि बुद्धीन्द्रियगणैः सह ।

अयं सोऽहमनन्तात्मा व्यवच्छेदोज्झिताकृतिः ।। २४

तिष्ठामि भरितैकात्मा पूर्णः सर्वावपूरकः ।

इति दैवीमुपाश्रित्य स्वच्छामात्मचमत्कृतिम् ।। २५

दैवत्वपरिपूर्णोऽन्तरदीनात्मावतिष्ठते ।

नास्तमेति न चोदेति न तुष्यति न कुप्यति ।। २६

न तृप्तिं न क्षुधं याति नाभिवाञ्छति नोज्झति ।

समः समसमाचारः समाभासः समाकृतिः ।। २७

सौम्यतामलमायातः समन्तात्सुन्दराशयः ।

आदेहमेक एवासावव्युच्छिन्नमहामतिः ।। २८

देवार्चनं करोत्येव दीर्घदीर्घमहर्निशम् ।

चित्तत्त्वचलितो देहो देवोऽस्य समुदाहृतः ।। २९

यथाप्राप्तेन सर्वेण तमर्चयति वस्तुना ।

समया सर्वया बुद्ध्या चिन्मात्रं देवचित्परम् ।। ३०

यथाप्राप्तक्रमोत्थेन सर्वार्थेन समर्चयेत् ।

मनागपि न कर्तव्यो यत्नोऽत्रापूर्ववस्तुनि ।। ३१

प्राप्तदेहतया नित्यं तथार्थक्रिययाऽनया ।

कामसंसेवनेनाऽथ पूजयेच्छोभनं विभुम् ।। ३२

भक्ष्यभोज्यान्नपानेन नानाविभवशालिना ।

शयनासनयानेन यथाप्तेनार्चयेच्छिवम् ।। ३३

कान्तान्नपानसंभोगसंभारादिविलासिना ।

सुखेन सर्वरूपेण संबुद्ध्याऽऽत्मानमर्चयेत् ।। ३४

आधिव्याधिपरीतेन मोहसंरम्भशालिना ।

सर्वोपद्रवदुःखेन प्राप्तेनात्मानमर्चयेत् ।। ३५

समस्तैश्च समस्तानां चेष्टानां जगतः स्थितेः ।

मृतिजीवितस्वप्नाद्यैः प्राप्तैरात्मानमर्चयेत् ।। ३६

दारिद्र्येणाथ राज्येन प्रवाहपतितात्मना ।

विचित्रचेष्टापुष्पेण शुद्धात्मानं समर्चयेत् ।। ३७

नानाकलहकल्लोलललनोल्लासशालिना ।

रागद्वेषविलासेन सौम्यमात्मानमर्चयेत् ।। ३८

सतां हृदयगामिन्या रूढया शशिशीतया ।

मैत्र्या माधुर्यधर्मिण्या हृत्स्थमात्मानमर्चयेत् ।। ३९

उपेक्षया करुणया सदा मुदितया हृदि ।

शुद्धया शक्तिपद्धत्या बोधेनात्मानमर्चयेत् ।। ४०

आकस्मिकोपयातेन स्थितेनानियतेन च ।

भोगाभोगैकभोगेन प्राप्तेनात्मानमर्चयेत् ।। ४१

भोगानामनिषिद्धानां निषिद्धानां च सर्वदा ।

त्यागेन वातिरागेण स्वात्मानं शुद्धमर्चयेत् ।। ४२

ईहितानीहितौघेन युक्तायुक्तमयात्मना ।

त्यक्तेनात्तेन चार्थेन ह्यर्थानामीशमर्चयेत् ।। ४३

नष्टं नष्टमुपेक्षेत प्राप्तं प्राप्तमुपाहरेत् ।

निर्विकारतयैतद्धि परमार्चनमात्मनः ।। ४४

सर्वदैव समग्रासु चेष्टानिष्टासु दृष्टिषु ।

परमं साम्यमाधाय नित्यात्मार्चाव्रतं चरेत् ।। ४५

सर्वं विन्देत सुशुभं सर्वं विद्याऽच्छुभाशुभम् ।

सर्वमात्ममयं कुर्यान्नित्यात्मार्चाव्रतं चरेत् ।। ४६

आपातरमणीयं यद्यच्चापातसुदुःसहम् ।

तत्सर्वं सुसमं बुद्ध्वा नित्यात्मार्चाव्रतं चरेत् ।। ४७

अयं सोहमयं नाहं विभागमिति संत्यजेत् ।

सर्वं ब्रह्मेति निश्चित्य नित्यात्मार्चाव्रतं चरेत् ।। ४८

सर्वदा सर्वरूपेण सर्वाकारविकारिणा ।

सर्वं सर्वप्रकारेण प्राप्तेनात्मानमर्चयेत् ।। ४९

अनीहितं परित्यज्य परित्यज्य तथेहितम् ।

उभयाश्रयणेनापि नित्यमात्मानमर्चयेत् ।। ५०

न वाञ्छता न त्यजता दैवप्राप्ताः स्वभावतः ।

सरितः सागरेणेव भोक्तव्या भोगभूमयः ।। ५१

उद्वेगो नानुगन्तव्यस्तुच्छाऽतुच्छासु दृष्टिषु ।

व्योम्ना चित्रपदार्थेषु पतितो ह्याततेष्विव ।। ५२

देशकालक्रियायोगाद्यदुपैति शुभाशुभम् ।

अविकारं गृहीतेन तेनैवात्मानमर्चयेत् ।। ५३

आत्मार्चनविधानेऽस्मिन्प्रोक्ता द्रव्यश्रियस्तु याः ।

एकेनैव समेनैता रसेन परिभाविताः ।। ५४

नाम्लानकट्व्यो नो तिक्ता न कषायाश्च काश्चन ।

चित्रैरपि रसैर्दिग्धा मधुरा एव ताः किल ।। ५५

समता मधुरा रस्या रसशक्तिरतीन्द्रिया ।

तया यद्भावितं चेत्यममृतं तत्क्षणाद्भवेत् ।। ५६

समतामृतरूपेण यद्यन्नाम विभाव्यते ।

तत्तदायाति माधुर्यं परमिन्दोरिव च्युतम् ।। ५७

समताकाशवद्भूत्वा यत्तु स्याल्लीनमानसम् ।

अविकारमनायासं तदेवार्चनमुच्यते ।। ५८

पूर्णेन्दुनेव पूर्णेन भाव्यं समसमत्विषा ।

स्वच्छेन चिद्धनैकेन ज्ञेनाप्युपलरूपिणा ।। ५९

अन्तराकाशविशदो बहिःप्रकृतकार्यकृत् ।

रञ्जनामिहिकामुक्तः संपूर्णो ज्ञ उपासकः ।।

स्वप्नेऽप्यदृष्टहृल्लेखमज्ञानाभ्रपरिक्षये ।

शान्ताहंतादिमिहिकं ज्ञः शरद्व्योम राजते ।। ६१

सोमार्कमस्तमितमानसमातृमेयं

सद्यःप्रसूतशिशुवेदनवद्वितानम् ।

पश्यन्प्रशान्तमतिचेतनचित्तबीजं

जीवन्ननुत्तमपदस्थित एव तिष्ठ ।। ६२

देशकालकरणक्रमोदितैः

सर्ववस्तुसुखदुःखविभ्रमैः ।

नित्यमर्चय शरीरनायकं

तिष्ठ शान्तसकलेहया धिया ।। ६३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० देवार्चनविधिर्नामैकोनचत्वारिंशः सर्गः ।। ३९ ।।